Topic 43

# अदन्त सर्वनाम 2।

जसः शी ।

अदन्तात् सर्वनाम्नो जसः शी स्यात् । अनेकाल्त्वात् सर्वादेशः । सर्वे ।

सर्वनाम्नः स्मै ।

अतः सर्वनाम्नो ङेः स्मै । सर्वस्मै ।

ङसिङ्योः स्मात्स्मिनौ ।

अतः सर्वनाम्न एतयोरेतौ स्तः । सर्वस्मात् ।

आमि सर्वनाम्नः सुट् ।

अवर्णान्तात्परस्य सर्वनाम्नो विहितस्यामः सुडागमः। एत्वषत्वे - सर्वेषाम् । सर्वस्मिन् । शेषं रामवत् । एवं विश्वादयोऽप्यदन्ताः ।

उभयशब्दो नित्यं द्विवचनान्तः

उभौ 2 । उभाभ्याम् 3 । उभयोः 2 ।

तस्येह पाठोऽकजर्थः । उभयशब्दस्य द्विवचनं नास्ति । डतर- डतमौ प्रत्ययौ । 'प्रत्ययग्रहणे तदन्तग्रहणम्' इति तदन्ता ग्राह्याः

नेम इत्यर्धे ।

समः सर्वपर्यायः तुल्यपर्यायस्तु न, यथा संख्यमनुदेशः समानाम' इति निर्देशात् ।